"अगाधजलसञ्चारी विकारी न च रोहितः ।
गण्डूषजलमात्रेण शफरी फर्फरायते ॥" )

गण्डूषा, पुं, ( गण्डूष+टाप् । ) गण्डूषः । इति लिङ्गादिसंग्रहे अमरः ॥ "सुखपूर्णतोयमिति भरतः ॥ रायमुकुटस्तु गण्डूषाशब्दो मुखपूरणे स्त्रीलिङ्गः । पुंलिङ्गस्तु गण्डूषशब्दश्चुलुकपरिमाण इति । यथा,—
अपां द्वादशगण्डूषैर्मुखशुद्धिर्विधीयते ॥"
इति तट्टीकासारसुन्दरी ॥

गण्डोलः, पुं, ( गडि+"कपिगडिगण्डिकटीति ।" उणां १ । ६७ । इति ओलच् ।) गुडः । ग्रासः । इति हेमचन्द्रः । ३ । ६० ॥

गण्यं, त्रि, ( गणं लब्धा इति । "धनगणं लब्धा ।" ४ । ४ । ८४ । इति यत् । यद्वा गण्यते इति । कर्म्मणि यत् । गणे भवः । "दिगादिभ्यो यत् ।" ४।३।५४ । इति यदित्येके । ) गणनीयम् । गणितव्यम् । तत्पर्य्यायः । गणेयम् २ संख्येयम् ३ । इति हेमचन्द्रः ।३।३३६ ॥ (यथा, ऋग्वेदे ।३।७।५।
"दिवो रुचः सुरुचो रोचमाना इला येषां गण्या माहिना गीः ॥" )

गतं, त्रि, ( गच्छति जानाति यातीति वा । "गत्यर्थाऽकर्म्मकेति ।" ३ । ४ । ७२ । इति कर्त्तरि क्तः ।) विज्ञातम् । यातम् । इति मेदिनी । ते १५ ॥ ( यथा, किरातार्ज्जुनीये । ४ । ५ ।
"नुनोद तस्य स्थलपद्मिनीगतं
वितर्कमाविष्कृतफेनसन्तति ॥"
गम्यते इति । भावे क्ते तु गमने क्लौ ॥ यथा, माघे । १ । २ ।
"गतं तिरश्चीनमनूरुसारथेः
प्रसिद्धमूर्द्धज्वलनं हविर्भुजः ॥")

गतनासिकः, त्रि, (गता विरहिता नासिका यस्य ।) नासिकारहितः । तत्पर्य्यायः । विग्रः २ । इत्यमरः ।२। ३ । ४६ ॥ विख्रः ३ । छिन्ननासिकः ४ । इति शब्दरत्नावली ॥ विनासिकः ५ विनसः ६ । इति जटाधरः ॥

गतसन्नकः, पुं, (गतं सन्नं सादहेतुको मदो यस्मात् यस्य वा इति कप् ।) निर्म्मदहस्ती । इति शब्दचन्द्रिका ॥

गतागतं, क्ली, (गतं ऊर्द्ध्वगमनं आगतं अधोगमनं यत्र ।) पक्षिगतिविशेषः । इति जटाधरः ॥ (गतञ्च आगतञ्च द्वयोः समाहारः ।) यातायातम् । यथा, रसमञ्जर्य्याम् ।
"गतागतकुतूहल नयनयोरपाङ्गावधि ।"
(तथा च भगवद्गीतायाम् । ९ । २१ ।
"ते तं भुक्त्वा स्वर्गलोकं विशालं
क्षीणे पुण्ये मर्त्यलोकं विशन्ति ।
एवं त्रयीधर्म्ममनुप्रपन्ना
गतागतं कामकामा लभन्ते"
गतं विनष्टं आगतं पुनः संसारागमन यस्मात् । यं प्राप्य जीवो न पुनर्निवर्त्तते इति वाक्यात् तथात्वम् । पुं, महादेवः । यथा, महाभारते ।
"नीतिर्ह्यनीतिः शुद्धात्मा शुद्धो मान्यो गतागतः ॥")

गतार्त्तवा, स्त्री, (गतं निवृत्तं आर्त्तवं रजोऽस्याः ।) वृद्धा । (गतं दुष्टं आर्त्तवमस्या इति ।) बन्ध्या । इति राजनिर्घण्टः ॥

गतिः, स्त्री, ( गम्+भावे क्तिन् । ) गमनकर्म्म । ( यथा, रघुवंशे । १ । ४ ।
"अथवा कृतवाग्द्वारे वंशेऽस्मिन् पूर्व्वसूरिभिः ।
मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः ॥")
तत्पर्य्यायः । वर्त्तते १ अयते २ लोटते ३ लोठते ४ स्यन्दते ५ कसति ६ सर्पति ७ स्यमति ८ स्रवति ९ संस्रते १० अवति ११ श्चोतति १२ ध्वंसति १३ वेनति १४ मार्ष्टि १५ गुरण्यति १६ शवति १७ कालयति १८ पेलयति १९ कण्टति २० पिस्यति २१ विस्यति २२ मिस्यति २३ प्रवते २४ प्लवते २५ च्यवते २६ कवते २७ गवते २८ नवते २९ चोदति ३० नक्षति ३१ सक्षति ३२ म्यक्षति ३३ सचति ३४ ऋच्छति ३५ तुरीयति ३६ चतति ३७ अतति ३८ गाति ३९ इयक्षति ४० सश्चति ४१ सरति ४२ रंहति ४३ यतते ४४ भ्रमति ४५ ध्रजति ४६ रजति ४७ लजति ४८ च्चियति ४९ धमति ५० मिनाति ५१ ऋण्वति ५२ ऋणोति ५३ स्वरति ५४ सिसर्त्ति ५५ वेविष्टि ५६ योषिष्टि ५७ ऋणाति ५८ ऋयते ५९ तेजति ६० दध्यति ६१ दभ्नोति ६२ युध्यति ६३ धन्वति ६४ अरुषति ६५ आर्य्यन्ति ६६ डीयते ६७ तकति ६८ टीयते ६९ इषति ७० फणति ७१ हनति ७२ अर्द्दति ७३ मर्द्दति ७४ सश्चते ७५ नसते ७६ हर्य्यति ७७ इयर्त्ति ७८ ईर्त्ते ७९ ईङ्खते ८० जयति ८१ साश्चति ८२ गन्ति ८३ आगनीगन्ति ८४ जंगन्ति ८५ जिन्वति ८६ जसति ८७ गमति ८८ शति ८९ भ्राति ९० भ्रयति ९१ वङ्गते ९२ रथर्य्यति ९३ जेहते ९४ खःकति ९५ चुम्पति ९६ प्लाति ९७ वाति ९८ याति ९९ इयति १०० द्राति १०१ डूलति १०२ एचति १०३ जैमति १०४ जवति १०५ वञ्चति १०६ अनिति १०७ पवते १०८ हन्ति १०९ सेधति ११० अगन् १११ अजगन् ११२ जिगाति ११३ पतति ११४ इन्वति ११५ द्रमति ११६ द्रवति ११७ वेति ११८ हयन्तात ११९ एति १२० जगायात् १२१ अशुधुः १२२ । इति द्वाविंशं शतं गतिकर्म्म । इति वेदनिघण्टौ २ अध्यायः ॥ ( गम्यतेऽस्यामिति । गम्+अधिकरणे क्तिन् । ) मार्गः । (यथा, भगवद्गीतायाम् । ८ । २६ ।
"शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते ।
एकया यात्यनावृत्तिमन्यया वर्त्तते पुनः ॥")
दशा । (यथा, तत्रैव । ६ । ३७ ।
"अयतिः श्रद्धयोपेतो योगाच्चलितमानसः ।
अप्राप्य योगसंसिद्धिं कां गतिं कृष्ण ! गच्छति ॥"
गम्यते ज्ञायतेऽनया । करणे क्तिन् ।) ज्ञानम् । (यथा, श्रीमद्भागवते ।७।५।३१।
"न ते विदुः स्वार्थगतिं हि विष्णुं
दुराशया ये बहिरर्थमानिनः ।
अन्धा यथान्धैरुपनीयमाना
स्तेऽपीशतन्त्र्यामुरुदाम्नि बद्धाः ॥"
"स्वस्मिन्नेव आत्मन्येव अर्थः प्रयोजनं येषां ते स्वार्थास्तत्त्वविदस्तेषां गतिर्ज्ञानिस्वरूपं विष्णुं दुराशया बहिरर्थमानिनो न विदुः जानन्ति ।" इति तट्टीकायां स्वामी ॥) यात्रा । ( गम्यते प्राप्यतेऽनया इति । गम्+करणे क्तिन् । ) अभ्युपायः । (यथा, महाभारते ।१३।१४९।९१।
"यज्ञ इज्यो महेज्यश्च क्रतुः सत्रं सतां गतिः ॥")
नाड़ीव्रणम् । सरणी । इति मदिनी । १४ ॥ (गम्+भावे क्तिन् । परिणतिः । यथा, किरातार्ज्जुनीये । १० । ४० ।
"मदनसुपदधे स एव तासां
दुरधिगमा हि गतिः प्रयोजनानाम् ॥"
"गतिः परिणतिः ।" इति तट्टीकायां मल्लिनाथः ॥ प्रमाणम् । यथा, तत्रैव । १
रूपेति चेदस्तु मृगः क्षतः क्षणा-
दनेन पूर्व्वं न मयेति का गतिः ॥"
"मया नेत्यत्र का गतिः किं प्रमाणम् ।" इति तट्टीकायां मल्लिनाथः ॥ गम्यते इति । गम्+कर्म्मणि क्तिन् । स्वरूपम् । यथा, तत्रैव । ६।३६।
"चरतस्तपस्तव वनेषु सदा
न वयं निरूपयितुमस्य गतिम् ।"
"तव वनेषु तपश्चरतोऽस्य गतिं स्वरूपं निरूपयितुम् ।" इति मल्लिनाथः ॥ विषयः । यथा, कुमारे । ५ । ६४ ।
"तपः किलेदं तदवाप्तिसाधनं
मनोरथानामगतिर्न विद्यते ।"
"मनोरथानां कामानां अगतिः अविषयः इति मल्लिनाथः ॥ कर्म्मफलम् । यथा, भगवद्गीतायाम् । । ९ । १८ ।
"गतिर्भर्त्ता प्रभुः साक्षी निवासः शरणं सुहृत् ॥"
"गतिः कर्म्मफलम् ।" इति शाङ्करभाष्यम् ।
ग्रहभेदेन गतिभेदो यथा,—
"अदृश्यरूपा कालस्य मूर्त्तयो भगणाश्रिताः ।
शीघ्रमन्दोच्चपाताख्या ग्रहाणां गतिहेतवः ॥"
इति सूर्य्यसिद्धान्तः ॥
तत्र तु नक्षत्रभेदेन बुधग्रहस्य गतिभेदो यथा, वृहत्संहितायाम् । ७ अध्याये ।
"नोत्पातपरित्यक्तः कदाचिदपि चन्द्रजो व्रजत्युदयम् ।
जलदहनपवनभयकृत् धान्यार्घक्षयविवृद्धै वा ॥
विचरञ्छ्रवणधनिष्ठा प्राजापत्येन्दुविश्वदेवानि ।
मृद्नन् हिमकरतनयः करोत्यवृष्टिं सरोगभयाम् ॥
रौद्रादीनि मघान्तान्युपाश्रिते चन्द्रजे प्रजापीड़ा ।
शस्त्रनिपातक्षुद्भयरोगानावृष्टिसन्तापैः ॥
हस्तादीनि विचरन् षड्भाण्युपपीड़यन् गवामशुभः ।
स्नेहरसार्घविवृद्धिं करोति चोर्व्वीं प्रभूतान्नाम् ॥
आर्य्यमणं हौतभुजं भद्रपदामुत्तरां यमेशञ्च ।
चन्द्रस्य सुतो निघ्नन् प्राणभृतां धातुसङ्क्षयकृत् ॥
आश्विनवारुणमूलान्युपमृद्नन् रेवतीञ्च चन्द्रसुतः ।